International Journal of Sanskrit Research 2018; 4(5): 134-136

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 134-136
© 2018 IJSR
www.anantaajournal.com
Received: 19-07-2018
Accepted: 23-08-2018

**सञ्जीवमाहात**
Research Scholar, Department-Sahitya Rastriya Sanskrit Sansthan, Sadashiv Campus, Puri, Odisha, India

**Correspondence**
**सञ्जीवमाहात**
Research Scholar, Department-Sahitya Rastriya Sanskrit Sansthan, Sadashiv Campus, Puri, Odisha, India

# अमरुशतकस्य टीका-टीकाकाराश्च

**सञ्जीवमाहात**

**प्रस्तावना**

संस्कृत साहित्यस्य लघुकाव्यान्तर्गते शतककाव्यपरम्पराया: इतिहासे मुक्तकश्लोकरचितं अमरुशतकं विशिष्टस्थानस्याधिकारी इति वर्तते। आनुमानिकं ख्रीष्टीयाष्टमशतकस्य अमरुरचितम् अमरुशतकं शृङ्गाररसात्मकं शतककाव्यम्। वस्तुत: टीका-भाष्यञ्च किमपि साहित्यसृष्टे: कष्टिपाथरस्वरुपम्। यद्काव्यस्य यतोऽधिकं टीका: उपलभ्यन्ते तद्काव्यं ततोऽधिकं समादृतं पण्डितसमाजे इति निश्चितं वदितुं शक्यते। यथा अभिज्ञानशकुन्तलम्, मेघदुतम्, पञ्चतन्त्रम्, श्रीमद्भगवद्गीतादि काव्य-नाटकम्। अमरुशतकस्यापि भूयसा: टीका: वर्तन्ते। अहमस्मिन् प्रबन्धे अमरुशतकस्य प्राप्तटीका: टीकाकाराश्च इति विषये प्रकाशिताप्रकाशितटीकासम्बन्धे आलोचनां पर्यालोचनां च करोमि।

अमरुशतकस्य टीका: नात्यल्पम्। Dr.S.K.De महोदय: तस्य 'Our Heritage' ग्रन्थे अवदत् — अमरुशतकस्य प्राय: चत्वारिंशत् टीका: उपलभ्यन्ते।[१] अध्यापक:डा.गोपेन्दुमुखोपाध्यायस्य मतानुसारेण— एतावत्कालपर्यन्तं अमरुशतकस्योपरि सप्तटीका: मुद्रिताक्षरेण उपलभ्यन्ते।[२] किन्तु तेन टीकानां नामानि न प्रदन्तम्। एवं मुख्यं चतुर: टीकाकारं विना पञ्चदशानां टीकाकाराणां नाम अजानत्। १८९३ ख्रिष्टाब्दस्य जार्मानपण्डितरिचर्डसाइमनमहाभाग: अमरुशतकस्य तत्कालपर्यन्तं प्रकाशितसंस्करणं अन्यान्यमातृकां च आधारीकृत्य एकं वैज्ञानिकसंस्करणं प्रकाशितवान्। तत्र स: चतसृषु टीकाधारेषु प्रकाशितं चत्वारि प्रामाणिकसंस्करणं स्वीकुर्वति। न तत्केवलं, भिन्नानां टीकाकाराणां सम्बन्धेऽपि आलोचनां कृतवान्। यथा-

१) अर्जुनवर्मदेवस्य रसिकसञ्जीवनीटीकाधारे पश्चिमीसंस्करणम्।
२) वेमभूपालस्य शृङ्गारदीपिकाटीकाधारे दक्षिणीसंस्करणम्।
३) रविचन्द्रस्य कामदाटीकाधारे वङ्गीयसंस्करणम्।
४) रुद्रमदेवस्य विदग्धचूडामणिटीकाधारे मिश्रसंस्करणम्।

किन्तु Dr. S.K.De महोदयेन चतुर्थसंस्करणं न स्वीकृतम्।[३]

उपर्युक्त चतस्र: टीका: चतुर: टीकाकाराञ्च विनापि अमरुशतकस्य वहुटीकाकारस्य तथा तेषां टीकायाश्च विषये ज्ञातुं शक्यते। परन्तु अनेकानां टीकाकाराणां नाम प्राप्तापि तै: रचितानां टीकानां नाम न ज्ञातम्। अमरुशतकस्य प्राप्त-टीकानां टीकाकाराणाञ्च एकं विवरणं निम्ने पद्रदत्तम् —

**टीकाकारा: टीका:**

| | | |
|---|---|---|
| १. | शेषरामकृष्ण: | रसिकसञ्जीवनी |
| २. | शङ्कर: | अमरुदर्पणम् |
| ३. | हरिहरभट्ट: | अमरुदर्पणम् |
| ४. | रामानन्दनाथ वाग्दास: | सरलाक्षरा |
| ५. | कोकसम्भव: | निष्टंकिताशया |
| ६. | चतुर्भुजमिश्र: | भावचिन्तामणि: |
| ७. | विद्याकरमिश्र: | विद्याकरी |
| ८. | श्रीवाक्कण्व: | अमरुशतकलीला |
| ९. | जसरुप: | नन्दनटीका |

| | | |
|---|---|---|
| १०. | ज्ञानानन्दकलाधरः | ज्ञानानन्दः |
| ११. | नारायणभट्टः | पुष्पोद्भेदः |
| १२. | सूर्यदासः | शृङ्गारतरङ्गिणी |

**टीकायाः नामहीनं कतिपयस्य टीकाकारस्यापि नाम प्राप्तवान्। ते यथा —**

| | |
|---|---|
| १. रामरुद्रन्यायवागीशः | ८. कविचन्द्रः |
| २. नन्दलालः | ९. नन्दीकेशः |
| ३. वेंकटवरदः | १०. शितिकण्ठः |
| ४. देवशङ्करभट्टः | ११. शीवाचार्यः |
| ५. गोष्ठीसुरेन्द्रः/गोष्ठीपुरेन्द्रः | १२. श्रीनिवासः |
| ६. वियोगकविः | १३. अमलानन्दनाथः |
| ७. रामानन्दनाथः | १४. हरिहरभट्टः |

अपि च टीकाकारः तथा टीकायाः नामहीनं एका टिप्पनी अपि प्राप्तवान् ।
अधुना अस्य शतककाव्यस्य कतिपयमुख्यटीकाकारस्य सम्बन्धे संक्षेपेण ओलाचनां करिष्यामि।

**१) अर्जुनवर्मदेवः —** मालवनरेशः परमायाः भोजस्य वंशधरः अर्जुनवर्मदेवः अमरुशतकस्य रसिकसञ्जीवनीटीकायाः प्रणेता। सः स्वकीयटीकायाः प्रारम्भे उक्तवान् –

''क्षिप्ताशुभः सुभटवर्मनरेन्द्रसूनुर्वीरव्रती जगति भोजकुलप्रदीपः।
प्रज्ञानवानमरुकस्य कवेः प्रसारश्लोकाञ्छतं विवृणुतेऽर्जुनवर्मदेवः।।''

अर्थात् सः भोजकुलप्रदीपः आसीत्। तस्य पितुर्नाम मालवनरेशः सुभटवर्मा। स आत्मानं 'वीरव्रती' 'प्रज्ञानः' चेति उक्तवान्। अस्य प्रमाणं १२७२ वैक्रमाव्दस्य एकस्मिन् दानपत्रेऽपि प्राप्तम्। एतस्मात् एतद् स्पष्टं यत् — तस्य स्थितिकालः त्रयोदशशतकस्य पूर्वार्द्धमासीत्। तस्य गुरोर्नाम वालसरस्वती यस्य अपरनाम मदनः। उपर्युक्तस्य दानपत्रस्यान्ते उल्लिखितोऽस्ति यत् — दानपत्रं राजगुरुणा मदनेन रचितः। अस्य मदनाचार्यस्य वर्णना निर्णयसागरप्रेसात् प्रकाशितस्यामरुशतकस्य भूमिकायां अस्ति। श्लोकं यथा —

''हरिहरगर्वपरिहर कविराजगजां कुशो मदनः।
मदनविमुद्रय वदनं हरिहरचरितं स्मरातीतम्।।''[४]

अस्य शतकस्य 'रसिकसञ्जीवनी' प्राचीनतमा, अर्थगाम्भीर्यपूर्णा भावव्यञ्चिकायुक्ता टीका। Dr. S.K.De, - C.R.Devadha-प्रद्युम्नपाण्डये-कमलेशदत्तत्रिपाठी प्रमुखानां महोदयानां विदुषां मते अमरुशतकस्य मूलपाठेन सह 'रसिकसञ्जीवनी' टीकायाः सर्वाधिकः सङ्गतिः अस्ति। अलंकारनिर्णय - रस–शृङ्गारस्यप्रकारभेदोऽन्यपारिभाषिकाश्च विषयाः अपि आलोच्यन्ते। तस्य सहजा-सरलाश्च अथच अथगाम्भीर्यपुर्णा भावव्यञ्जनामयी व्याख्यापद्धतिः तं महतः टीकाकारस्य उच्चासनं प्रदत्तवान्।

**२. रुद्रमदेवकुमारः —** श्रैङ्गारिकामरुशतकस्य विख्यातः तथा अन्यतमः टीकाकारः रुद्रमदेवकुमारः 'विदग्धचूडामणि' इति टीकायाः प्रणयनं कृतवान्।
रुद्रमदेवकुमारस्य कालः त्रयोदशशतकस्य शेषार्धः आसीत्। C.R. Devadhar महोदयः तस्य अमरुशतकस्य भूमिकायां अवदत् — काकतीयराजवंशस्य नृपः प्रतापरुद्रः (१२९०-१३६२ खीः) टीकाकारः रुद्रमदेवकुमारश्च अभिन्नं व्यक्तित्वमिति।
अयं रुद्रमदेवकुमारः शृङ्गारदीपिकाटीकाप्रणेता वेमभूपालस्य पुर्ववर्ती इति सिध्यति। रुद्रमदेवकुमारः 'ययातिचरितम्' 'उषारागोदयम्' च नाटकद्वयं लिखितवान्। सम्भवतः एतत् नाटकद्वयं तस्य राज्याभिषेकस्य पुर्ववर्ति इति मन्यते।
अनेकालङ्कारिकैः साहित्यकैश्च तेन विरचितेन टीकायाः नाम 'विदग्धचूडामणि' इति कथ्यन्ते। पुनः Dr. S.K.De महोदयः एनां 'विवृतिः' 'टिप्पनी' 'अवचुरि' वेति वक्तुमिच्छति। एतस्यां टिप्पन्यां कुत्रापि किमपि उदाहरणानां रसालङ्काराणां नायक-नायिकानाञ्च नामादीनाम् उल्लेखो नास्ति। श्लोकस्य अन्वयानुसारेण केवलं अर्थप्रदानमकरोत्। Dr.S.K.De महोदयः एतां 'कथम्भुतीटीका' इत्याख्यां दत्तवान्।

**३. वेमभूपालः —** अमरुशतकस्य एकः अन्यतमः टीकाकारः वेमभूपालः 'शृङ्गारदीपिका' इति मातृकायाः प्रणेता। स्वरचितायां मातृकायां सः आत्मपरिचयं प्रदत्तवान्। यथा —

''कीर्त्या जाग्रति रेडिपोतनृपतिः श्रीकोमटीन्द्रस्ततो।
नागक्ष्मापतिरित्युपान्तवपुषो धर्मार्थकामा इव।।
वेमाधिपो माचविभुश्च नन्दनौ श्रीकोमटीन्द्रस्य गुणैकसंश्रयौ।
भूलोकमेकोदरजन्मवाञ्छया भुयोऽवतीर्णाविव रामलक्ष्मणौ।।''

एतस्मात् आत्मपरिचयात् एतद् ज्ञायते यत् - वेमभुपालः रेड्डीनृपतेः कोमटीन्द्रस्य पुत्रः आसीत्। तस्याविर्भावकालः १४०३-१४२० खीष्टाब्दः।[५]
वेमभूपालस्य उपाधिरासीत् वीरनारायण जगनोव्वगण्डश्च। शृङ्गारदीपिका टीकां विनापि स अलंकारग्रन्थः 'साहित्यचिन्तामणि' संगीतग्रन्थश्च 'संगीतचिन्तामणि' चेति ग्रन्थद्वयं लिखितवान्। अमरुशतकस्य शृङ्गारदीपिकाटीकायां १०३ श्लोकाः वर्तमानाः। स्वकीयटीकासम्बन्धे सोऽवदत्–''प्रक्षिप्तान् श्लोकान् परिहृत्य अहं मूलश्लोकानामुपरि विदुषामिष्टां टीकां लिखामि।'''रसिकसञ्जीवनी' टीकामनन्तरं द्वितीयान्यतमा टीका वेमभूपालस्य एषा शृङ्गारदीपिकेति।

**४. रविचन्द्रः —** अमरुशतकस्य अपरः एकः अन्यतमः प्रसिद्धः टीकाकारः रविचन्द्रः। तेन विरचितायाः टीकायाः नाम 'कामदा'इति। टीकायां प्रारम्भे आत्मपरिचयं प्रदत्तवान्। एतस्यां कवेः नामः 'ज्ञानानन्द-कलाधर-रविचन्द्रः' इति लिखितोऽस्ति। एवं कविः आत्मानं कविकुलालङ्कारचूडामणिः' इत्याख्यां दत्तवान्। पुनः ढाकाविश्वविद्यालये प्राप्तमातृकानुसारेण कवेर्नाम 'खानरविचन्द्रकलाधरः' इति। अस्मात् स्पष्टं वोध्यते यत् रविचन्द्रः केनापि मुसलमानशासकेन सम्मानितोऽभवत्।
टीकाकारस्य रविचन्द्रस्य कालः स्पष्टप्रमाणाभावेण ज्ञातुं न शक्यते। तथापि गवेषकाः रविचन्द्रस्य कालविषये किञ्चिद् प्रमाणं प्रस्तुतवन्तः। गवेषकानां मते रविचन्द्रः त्रयोदशशतकस्य परवर्त्तिकालस्य टीकाकारः भवेत्।[६]
रविचन्द्रस्य टीकायां १०० श्लोकसन्निवेशः दृष्टः। कवेः व्याख्यायां विशेषवैशिष्ट्यमिदं यत् श्लोकानां द्व्यर्थकार्थेन व्याख्या–आध्यात्मिकं श्रैङ्गारिकञ्च। परवर्तिनिकाले कवेः शान्तरसात्मकव्याख्यामाधारीकृत्य वैष्यवकविः कर्णपुरः अस्य शतकस्य केषाञ्चित् मूलश्लोकानां गठनगतं परिवर्तनं न कृत्वा राधा–कृष्णायो प्रणयरुपेण द्रष्टुमिच्छति स्म।
एतावत्कालपर्यन्तं अमरुशतकस्य सर्वसाकुल्ये पञ्चदशः षोडशः वा संस्करणं प्रकाशितमभवत्। तद् सत्वेऽपि अमरुशतकस्य चतस्रः पञ्चः वा मुख्याः टीकाः द्वे तिस्रः वा प्रादेशिकाः टीकाः (यथा हिन्दी माराठ्यादि टीकाः) मुद्रिताक्षरेण प्रकाशिताः। किन्तु अमरुशतकस्य प्राप्तापरापराः टीकावत् प्रादेशिकभाषया लिखिताः टीकाः अपि चतुरः प्रधानं संस्करणमवलम्ब्य लिखिताः इति रिचार्डसाइमनमहोदयेनोक्तम्। तद्सत्त्वेऽपि तत्र कवेः मौलिक-प्रतिभाया: निदर्शनं प्राप्तम्। यदपि भवतु, अमरुशतकं शृङ्गाररसस्य काव्यम्–अस्मिन् विषये नास्ति कोऽपि सन्देहः। यद्यपि रविचन्द्रः प्रमुखादि व्याख्याकारः शान्तरसपक्षे व्याख्यां कृतवान् तत् केवलं विशेषोद्देश्यप्रणोदितं वलपुर्वकञ्चेति मन्यते। भतृहरिः प्रमुखः

कविः रतिमङ्गनाञ्च हेयत्वेन वर्णयति। रतिर्वाङ्गना न केवलं मनुष्यजीवनस्योपादानविशेषौ अपि तु समवायिविशेषौ एवेति अमरुकस्य दृष्टिः। अपि च शृङ्गाररसस्य स्थायिभावस्य वर्णने अर्जुनवर्मदेवः सिद्धहस्तः। अर्जुनवर्मदेवस्य सहजा सरला अथच शृङ्गाररसप्रधाना व्याख्या अपरापरटीकाकारेषु श्रेष्ठा। वेमभूपालस्य शृङ्गारदीपिकाटीकापि श्रेष्ठा इति कोऽपि वा वदितुं वाञ्छति किन्तु अर्जुनवर्मदेवस्य 'रसिकसञ्जीवनी' यथा शृङ्गार-वर्णने यथायथं तथा मूलपाठानुगा इति। तदेव सर्वप्राचीनः टीकाकारः अर्जुनवर्मदेवः सर्वश्रेष्ठटीकाकारस्य पदालंकरणयोग्यः इति विषये नास्ति कोऽपि सन्देहः।

## तथ्यसूत्रम्

१. Our Heritage.1954; 2(1):13-14.
२. संस्कृत साहित्येर इतिवृत्त - अध्यापक डाः गोपेन्दुमुखोपाध्याय पृ.-४१२
३. अमरुशतकम् - C.R. Devadhar, Introduction page 12
४. अमरुशतकम् - कमलेश दत्तत्रिपाठी - भूमिका पृ-२१
५. अमरुशतकम् - कमलेश दत्तत्रिपाठी - भूमिका पृ-२२
६. अमरुशतकम् - कमलेश दत्तत्रिपाठी - भूमिका पृ-२३

## ग्रन्थसूची :


1. संस्कृत साहित्येर इतिहास - धीरेन्द्रनाथ वन्द्योपाध्याय, कोलकाता डिसेम्वर - २००५/सि.
2. संस्कृत साहित्य सम्भार - नवपत्र प्रकाशन, कोलकाता-२०११
3. संस्कृत साहित्येर इतिवृत्त - अध्यापकः डाः गोपेन्दु मुखोपाध्याय कोलकाता - १४१९
4. संस्कृतसाहित्येतिहासः आचार्यः लोकमणि दाहाल, वाराणसी - २०११
5. अमरुशतकपाम् – कमलेशदत्तत्रिपाठी - मित्रप्रकाशन प्राइभेट लिमिटेड, इलाहावाद, १९६९
6. अमरुशतकम् - C.R.Devadhar - Oriental Book Agency POONA-2, 1959
7. अमरुशतकम् - श्री प्रद्युम्न पाण्ड्ये - चौखाम्बा संस्कृत सीरीज, अफिस, वाराणसी - २०११
8. संस्कृत साहित्य का इतिहास - वलदेव उपाध्याय।